## श्रीमन् निगमान्त महादेशिकै: अनुगृहीतम्
## || न्यास दशकम् ||

### तनियन्

श्रीमान् वेङ्कटनाथार्य: कवितार्किक केसरी ।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥

---

## श्रीमन् निगमान्त महादेशिकै: अनुगृहीतम्
## ॥ न्यास दशकम् ॥

अहं मद्रक्षण भरो मद्रक्षण फलं तथा ।
न मम श्रीपतेरेव इति आत्मानं निक्षिपेत् बुध: ॥ 1

न्यस्यामि अकिञ्चन: श्रीमन् अनुकूलो-न्यवर्जित: ।
विश्वास प्रार्थना पूर्वं आत्म रक्षा भरं त्वयि ॥ 2

स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम् ।
स्वदत्त स्वधिया स्वार्थं स्वस्मिन् न्यस्यति मां स्वयम् ॥ 3

श्रीमन् अभीष्ट वरद त्वां अस्मि शरणं गत: ।
एतत् देहावसाने मां त्वत्पादं प्रापय स्वयम् ॥ 4

त्वत् शेषत्वे स्थिर धियं त्वत् प्राप्त्येक प्रयोजनम् ।
निषिद्ध काम्य रहितं कुरु मां नित्य किङ्करम् ॥ 5

देवी भूषण हेत्यादि जुष्टस्य भगवंस्तव ।
नित्यं निरपराधेषु कैङ्कर्येषु नियुङ्क्ष्व माम् ॥ 6

मां मदीयं च निखिलं चेतनाचेतन आत्मकम् ।
स्व कैङ्कर्य उपकरणं वरद स्वीकुरु स्वयम् ॥ 7

त्वदेक रक्ष्यस्य मम त्वमेव करुणाकर ।
न प्रवर्तय पापानि प्रवृत्तानि निवर्तय ॥ 8

अकृत्यानां च करणं कृत्यानां वर्जनं च मे ।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो ॥ 9

श्रीमान् नियत पञ्चाङ्गं मद्रक्षण भरार्पणम् ।
अचीकरत् स्वयं स्वस्मिन् अतो-हमिह निर्भर: ॥ 10

**॥ इति न्यास दशकं समाप्तम् ॥**

कवितार्किक सिंहाय कल्याण गुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नम: ॥

---